# Skandaproktam Shivavigrahavarnanam

# સ્કન્દપ્રોક્તં શિવવિગ્રહવર્ણનમ્

## Document Information

Text title : Skandaproktam Shivavigrahavarnanam

File name : skandaproktaMshivavigrahavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mahAdevAkhyaH ekAdashamAMshaH | adhyAyaH 1 | 23-32.1||

Latest update : October 29, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 3, 2024

*sanskritdocuments.org*

# સ્કન્દપ્રોક્તં શિવવિગ્રહવર્ણનમ્

(શિવરહસ્યાન્તર્ગતે મહાદેવાખ્યે)

- સ્કન્દજૈગીષવ્યસંવાદે -

સુબ્રહ્મણ્ય ઉવાચ ।

શ્રૃણુષ્વ શામ્ભવશ્રેષ્ઠ રહસ્યં મુનિસમ્મિતમ્ ।
પુરા કૈલાસશિખરે સુખાસીનં મહેશ્વરમ્ ॥ ૨૩॥

રત્નસિહ્માસને દિવ્યે વૈદ્રુમે મણ્ટપોત્તમે ।
સાયન્તનાભ્રપટલીપ્રભાધિકવિરાજિતે ॥ ૨૪॥

શોશુભ્યત્સ્તમ્ભકુમ્ભાગ્રવૃષભાસ જિતે મુને ।
ધૂપદીપાદિવિતતે ગણવૃન્દવિરાજિતે ॥ ૨૫॥

રમ્યપુષ્પવનાપારગન્ધમેદુરદિઙ્મુખે ।
વિતાનપ્રચ્છદપટપાટિતાન્તરસુન્દરે ॥ ૨૬॥

ચમ્પકાશોકપુન્નાગસૌગન્ધિકુસુમાસ્તૃતે ।
પ્રફુલ્લકેતકોદ્દામમલ્લીપઙ્કજગન્ધિલે ॥ ૨૭॥

નન્દિભૃઙ્ગિમહાકાલ ચણ્ડભૈરવસેવિતે ।
મયા દ્વિરદવક્ત્રેણ પાર્શ્વતઃ પરિસેવિતે ॥ ૨૮॥

પપ્રચ્છ પાર્વતીકાન્તં નિતાન્તં શાન્તવિગ્રહમ્ ।
કૃતાન્તં હરમાશાસ્યં વેદાન્તાર્થૈકગોચરમ્ ॥ ૨૯॥

પ્રણમ્ય પ્રાઞ્જલિર્દેવી ભર્તુર્વક્ત્રમુદૈક્ષત ।
ઉત્પલાભકટાક્ષેણ સરસાનનપઙ્કજા ॥ ૩૦॥

સર્વહૃત્પ્રણવોદાર જગચ્ચક્રપ્રવર્તકઃ ।
ઇઙ્ગિતજ્ઞસ્તદાપ્રાહ દેવીમાનન્દનિર્ભરામ્ ॥ ૩૧॥

સરસેન કટાક્ષેણ કૃપામૂર્તિર્મહેશ્વરઃ । ૩૨.૧

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સ્કન્દપ્રોક્તં શિવવિગ્રહવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । મહાદેવાખ્યઃ એકાદશમાંશઃ । અધ્યાયઃ ૧ । ૨૩-૩૨.૧॥

- .. shrIshivarahasyam . mahAdevAkhyaH ekAdashamAMshaH . adhyAyaH 1 . 23-32.1..

Proofread by Ruma Dewan

---

*Skandaproktam Shivavigrahavarnanam*

pdf was typeset on November 3, 2024

Please send corrections to *sanskrit@cheerful.com*